


**Hari Om**

# Sri Sarada Bhujangam

सुवक्षोज–कुम्भां सुधापूर्ण–कुम्भां
प्रसादा–वलम्बां प्रपुण्या–वलम्बाम् ।
सदास्येन्दु–बिम्बां सदानोष्ठ–बिम्बां
भजे शारदाम्बाम् अजस्रं मदम्बाम् ॥ 1॥

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां
कलाभिर्–विनिद्रां कलापैः सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्रां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 2॥

ललामाङ्कफालां लसद्गानलोलां
स्वभक्तैक–पालां यशःश्री–कपोलाम् ।
करेत्–वक्षमालां कनत्प्रत्न–लोलां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 3॥

सुसीमन्त–वेणीं दृशा निर्जितैणीं
रमत्–कीरवाणीं नमद्–वज्रपाणीम् ।
सुधा–मन्थरास्यां मुदा चिन्त्यवेणीं
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 4॥

सुशान्तां सुदेहां दृगन्ते कचान्तां
लसत्–सल्लताङ्गीम्–अनन्तामचिन्त्यां ।
स्मरेत्–तापसैः सङ्ग–पूर्वस्थितां तां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 5॥

कुरङ्गे तुरङ्गे मृगेन्द्रे खगेन्द्रे
मराले मदेभे महोक्षेऽधिरूढाम् ।
महत्यां नवम्यां सदा सामरूपां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 6॥

ज्वलत्–कान्तिवह्निं जगन्–मोहनाङ्गीं
भजे मानसाम्भोज सुभ्रान्त–भृङ्गीं ।
निजस्तोत्र–सङ्गीत–नृत्य–प्रभाङ्गीम्
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 7॥

भवाम्भोज–नेत्राज सम्पूज्यमानां
लसन्–मन्दहास प्रभा–वक्त्र–चिह्नाम् ।
चलच्–चञ्चला–चारु ताटङ्क–कर्णां
भजे शारदाम्बां अजस्रं मदम्बाम् ॥ 8॥

इति श्रीमत्–परमहंस परिव्राजकाचार्यस्य श्रीगोविन्द–भगवत्–पूज्यपाद–शिष्यस्य
श्री शङ्कर–भगवतः कृतौ शारदा–भुजङ्ग–प्रयाताष्टक संपूर्णम् ॥